श्रीमत् सुदर्शन भगवते नमः

श्रीमते रामानुजाय नमः

॥ श्री सुदर्शन शतकम् ॥

रङ्गेश विज्ञप्ति करामयस्य चकार चक्रे शनुतिं निवृत्तये ।
समाश्रयेऽहं वरपूरणीं यः तं कूरनारायण नामकं मुनिम् ॥

सौदर्शन् युज्जिहाना दिशि विदिशि तिरस्कृत्य सावित्रमर्चिः
बाह्या बाह्यान्ध कार क्षत जगद गदङ्कार भूम्ना स्वधाम्ना ।
दोः खर्जू दूर गर्ज द्विबुध रिपुवधू कण्ठ वैकल्य कल्या
ज्वाला जाज्वल्यमाना वितरतु भवतां वीप्सयाऽभिप्सितानि ॥ 1

प्रत्युद्यातं मयुखैर्नभसि दिनकृतः प्राप्तसेवं प्रभाभिः
भूमौ सौमे रवीभिर्दिवि वरिवसितं दीप्तिभिर् देवधाम्नाम् ।
भूयस्यै भूतये वः स्फुरतु सकल दिग्भ्रान्त सान्द्रस्फुलिङ्गं
चाक्रं जाग्रत्प्रतापं त्रिभुवन विजय व्यग्रमुग्रं महस्तत् ॥ 2 ॥

पूर्णे पूरैस्सुधानां सुमहति लसतस् सोम बिम्बालवाले
बाहा शाखा वरुद्ध क्षितिगगन दिवश्चक्र राजद्रुमस्य ।
ज्योतिश् छद्मा प्रवाळः प्रकटित सुमनः संपदुत्तं स लक्ष्मीं
पुष्णन् नाशा मुखेषु प्रदिशतु भवतां सप्रकर्षं प्रहर्षम् ॥ 3 ॥

आरादारात् सहस्राद् विसरति विमत क्षेप दक्षाद्य दक्षात्
नाभेर्भास्वत्सनाभेर्निजविभव परिच्छिन्न भुमेश्च नेमेः ।
आम्नायैरेककण्ठैः स्तुत महिम महो माधवीयस्य हेतेः
तद्वो दिक्ष्वेधमानं चतसृषु चतुरः पुष्यतात् पूरुषार्थान् ॥ 4 ॥

श्यामं धाम प्रसृत्या क्वचन भगवतः क्वापि बभ्रु प्रकृत्या
शुभ्रं शेषस्य भासा क्वचन मणिरुचा क्वापि तस्यैव रक्तम् ।
नीलं श्रीनेत्र कान्त्या क्वचिदपि मिथुनस्याऽऽदिमस्येव चित्रां
व्यातन्वानं वितान श्रियमुपचिनुतात् शर्म वश्चक्रभानम् ॥ 5 ॥

शंसन्त्युन्मेष मुच्छोषित परमहसो भास्वतः कैटभारेः
इन्धे सन्ध्येव नक्तञ्चर विलयकरी या जगद्वन्दनीया ।
बन्धूकच्छाय बन्धुच्छविघटित घनच्छेद मेदस्विनी सा
राथाङ्गी रश्मिभङ्गी प्रणुदतु भवतां प्रत्यहोत्थानमे नः ॥ 6 ॥

साम्यं धूम्या प्रवृद्धया प्रकटयति नभस् तारका जालकानि
स्फौलिङ्गीं यान्ति कान्तिं दिशति यदुदये मेरुरङ्गार शङ्काम् ।
अग्निर्मग्नार्च्चिरैक्यं भजति दिननिशा वल्लभौ दुर्लभाभौ
ज्वालावर्ताविव स्तः प्रहरणपतिजं धाम वस् तद्धिनोतु ॥ 7 ॥

दृष्टेऽधिव्योम चक्रे विकचन वजपा सन्निकासे सकाशं
स्वर्भानुर्भानुरेष स्फुटमिति कलयन्नागतो वेगतोऽस्य् ।
निष्टप्तो यैर्निवृत्तो विधुमिव सहसा स्प्रष्टुमद्यापि नेष्टे
घर्मांशुं ते घटन्ताम् अहित विहतये भानवो भास्वरा वः ॥ 8 ॥

देवं हेमद्रितुङ्गं पृथु भुजशिखरं बिभ्रतीं मध्य देशे
नाभिद्वीपाभिरामाम् अरविपिनवतीं शेषशीर्षा सनस्थाम् ।
नेमिं पर्यायभूमिं दिनकर किरणा दृष्टसीमः परीत्य
प्रीत्यै वश्चक्रवालाचल इव विलसन्नस्तु दिव्यास्त्र रश्मिः ॥ 9 ॥

एकं लोकस्य चक्षुर्द्धिधम पनुदत् कर्म नम्रत्रिनेत्रं
दात्रर्थानां चतुर्णां गमय दरिगणं पञ्चतां षड्गुणाढ्यम् ।
सप्तार्चिश्शोषिताष्टा पद नवकिरण श्रेणि रज्यद्दशाशम्
पर्यस्या द्वश्शताङ्गा वयव परिबृढ ज्योति रीतीस्सहस्त्रम् ॥ 10 ॥

उच्चण्डे यच्छिखण्डे निबिडयति नभः क्रोडमर्कोऽटति द्याम्
अभ्यस्य प्रौढताप ग्लपित वपुरपो बिभ्रती रभ्रपङ्क्तीः ।
धत्ते शुष्यत्सुधोत्सो विधुरप मधुनः क्षौद्र कोशस्य साम्यम्
रक्षन्त्वस्त्र प्रभोस्ते रचित सुचरित व्युष्टयो घृष्टयो वः ॥ 11 ॥

पद्मौघो दीर्घिकाम्भस्यवनि धरतटे गैरिकाम्बु प्रपातः
सिन्दूरं कुञ्जराणां दिशिदिशि गगने सान्ध्यमेघ प्रबन्धः ।
पारावारे प्रवाळो वनभुवि च तथा प्रेक्ष्यमाणः प्रमुग्धैः
साधिष्ठं वः प्रबोधं जनयतु दनुजद्वेषिणस्त्वैषराशिः ॥ 12 ॥

भोनो ! भा नो त्वदीया स्फुरति कुमुदिनी मित्र ! ते कुत्र तेजः
ताराः ! स्ताऽऽरादधीरोऽस्यनल ! न भवतः स्वैरमैरम्मदार्चिः ।
शंसन्तीत्थं नभःस्था यदुदय समये चक्रराजांशवस्ते
युष्माकं प्रौढताप प्रभव भवगदा पक्रमाय क्रमन्ताम् ॥ 13 ॥

जग्ध्वा कर्णेषु दूर्वाङ्कुरमरि सुदृशाम् अक्षिषु स्वर्वधूनां
पीत्वा चाम्भश्चरन्त्यः सवृष मनुगता वल्लवेनाऽऽदिमेन ।
गावो वश्चक्र भर्तुः परममृत रसं पश्रितानां दुहानाः
ऋद्धिं स्वालोकलुप्त त्रिभुवन तमसः सानुबन्धां ददन्ताम् ॥ 14 ॥

सेनां सेनां मघोनो महति रणमुखेऽलं भयं लम्भयन्तीः
उत्से कोष्णालु दोष्णां प्रथमदिविषदां आवलीर्याऽवलीढे ।
विश्वं विश्वम्भराद्यं रथपदधिपतेर्लीलया पालयन्ती ।
वृद्धिस्सा दीधितीनां वृजिन मनुजनुर्माजयत्वार्जितं वः ॥ 15 ॥

तप्ता स्वेनोष्मणेव प्रतिभटवपुषां अस्त्रधारा धयन्ती
प्राप्तेव क्षीबभावं प्रति दिशमसकृत् तन्वती घूर्णितानि ।
वंशास्थिस्फोटशब्दं प्रकटयति पटून् याऽऽवहन्त्यट्टहासान्
भा सा वः स्यन्दनाङ्ग प्रभु समुदयिनी स्पन्दतां चिन्तिताय ॥ 16

देवै रासेव्यमानो दनुज भटभुजा दण्डदर्पोष्मतप्तैः
आशा रोधोति लङ्घी लुठ दुडु पटली लक्ष्यडिण्डीरपिण्डः ।
रिङ्गज्ज्वाला तरङ्ग त्रुटित रिपु तरु व्रात पातोग्रमार्गः
चाक्रो वश्शोचिरोघश्शमयतु दुरिता पह्नवं दाववह्निम् ॥ 17 ॥

भ्राम्यन्ती संश्रितानां भ्रम शमनकरी छन्नसूर्यप्रकाशा
सूर्यालोकानुरूपा रिपुहृदय तमस्कारिणी निस्तमस्का ।
धारा संपातिनी च प्रकटित दहना दीप्ति रस्त्रे शितुर्वः
चित्रा भद्राय विद्रावित विमतजना जायताम् आयताय ॥ 18 ॥

निन्ये वन्येव काशी दवशिखि जटिल ज्योतिषा येन दाहं
कृत्या वृत्या विलिल्ये शलभ सुलभया यत्र चित्रप्रभावे ।
रुद्रोऽप्यद्रेर्दुहित्रा सह गहनगुहां यद्भयादभ्ययासीत्
दिश्याद्विश्वार्चितो वः स शुभमनिभृतं शौरिहेति प्रतापः ॥ 19

उद्यन् बिम्बादुदारान्नयन जल हिमं मार्जयन् निर्जरीणां
अज्ञान ध्वान्त मूर्च्छा कर जनिरजनी भञ्जन व्यञ्जिताध्वा ।
न्यक्कुर्वाणो ग्रहाणां स्फुरणमपहरन् अर्चिषः पावकीयाः
चक्रेशार्क प्रकाशो दिशतु दश दिशो व्यश्नुवानं यशो वः ॥ 20

वर्गस्य स्वर्गधाम्नामपि दनुजनुषां विग्रहं निग्रहीतुं
दातुं सद्योबलानां श्रियमतिशयिनीं पत्रभङ्गानुवृत्त्या ।
योक्तुं देदीप्यते या युगपदपि पुरो भूतिमय्या प्रकृत्या
सा वो नुद्यादविद्यां द्युतिरमृतरस स्यन्दिनी स्यान्दनाङ्गी ॥ 21

दाहं दाहं सपत्नान् समरभुवि लसद्भस्मना वर्त्मना यान्
कृव्यादप्रेतभूताद्यभिलषितपुषा प्रीतकापालिकेन ।
कङ्कालैः कालधौतं गिरिमिव कुरुते यः स्वकीर्तेर्विहर्तुं
घृष्टिस्सान् दृष्टिकं वः सकलमुपनयत्वायुधाग्रेसरस्य ॥ 22 ॥

दग्धानां दानवानां सभसित निचयैरस्थिभिस्सर्वशुभ्रां
पृथ्वीं कृत्वाऽपि भूयो नवरुधिरझरी कौतुकं कौणपेभ्यः ।
कुर्वाणं बाष्पपूरैः कुचतटघुसृण क्षालनैस्तद्वधूनां
पापं पापच्यमानं शमयतु भवतां शस्त्रराजस्य तेजः ॥ 23 ॥

मागान्मोषं ललाटानल इति मदनद्वेषिणा ध्यायतेव
स्त्रष्ट्रा प्रोन्निद्रवासां बुजदलपटल प्लोषमुत्पश्यतेव ।
वज्राग्निर्मास्म नाशं व्रज्रदिति चकितेनेव शक्रेण बद्धैः
स्तोत्रैरस्त्रेश्वरस्य द्यतु दुरितशतं द्योतमाना द्युतिर्वः ॥ 24 ॥

शस्त्रास्त्रं शात्रवाणां शलभकुलमिव ज्वालया लेलिहाना
घोषैः स्वैः क्षोभयन्ती विघटित भगवद्योगनिद्रान् समुद्रान् ।
व्यूढोरः प्रौढचार त्रुटित पटुरटत्कीकस क्षुण्णदैत्या
नेमिस्सौदर्शनी वः श्रियमतिशयिनीं दाशतात् आशताब्दम् ॥25

धारा चक्रस्य तारा गणकणविततिद्योति तद्युप्रचारा
पारावाराम्बुपूर क्वथन पिशुनितोत्ताल पातालयात्रा ।
गोत्राद्रि स्फोटशब्द प्रकटित वसुधा मण्डली चण्डयाना
पन्थानं वः प्रदिश्यात् प्रशमन कुशला पाप्मनाम् आत्मनीनम् ॥26

यात्रा या त्रातलोका प्रकटित वरुण त्रासमुद्रे समुद्रे
सत्वा सत्वा सहोष्मा कृत सगरुदगस्पन्ददाना ददाना ।
हानिं हा निन्दितानां जगति परिषदां दानवीनां नवीनाम्
चक्रे चक्रेश नेमिः शमुपहरतु सा सप्रभाव प्रभावः ॥ 27 ॥

यत्रा मित्रान् दिधक्षौ प्रविशति बलिनो धाम निस्सीम धाम्नि
ग्रस्तापस्तापशिर्णैः प्रगुणित सिकतो मौक्तिकैश्शौक्तिकेयैः ।
राशिर्वारामपारां प्रकटयति पुनर्वैरिदाराश्रुपूरैः
वृद्धिं निर्याति निर्यापयतु स दुरितानि अस्त्रराजप्रधिर्वः ॥ 28 ॥

कक्ष्यातौल्येन कद्रू तनय फणमणीन् कल्यदीपस्य युञ्जन्
पातालान्तः प्रपाती निखिलमपि तमः स्वेन धाम्ना निगीर्य ।
दैतेय प्रेयसीनां वमति हृदि हतप्रेयसां भूयसा यः
चक्राग्रीयाग्रदेशो दहतु विलसितं बह्वसा वंहसां वः ॥ 29 ॥

कृष्णाम्भोदस्य भूषा कृतनयन नय व्याहतिर्भार्गवस्य
प्राप्ताम् आवेदयन्ती प्रतिभट सुदृशाम् उद्भटां बाष्पवृष्टिम् ।
निष्टप्ताष्टापद श्रीः सममरचमू गर्जितैरुज्जिहाना
कीर्तिं वः केतकीभिः प्रथयतु सदृशीं चञ्चला चक्रधारा ॥ 30

वप्राणां भेदनीं यः परिणतिमखिलश्लाघनीयां दधानः
क्षुण्णां नक्षत्रमालां दिशिदिशि विकिरन् विद्युता तुल्यकक्ष्यः ।
निर्याणेनोत्कटेन प्रकटयति नवं दानवारि प्रकर्षम्
चक्राधीशस्य भद्रो वशयतु भवतां स प्रधिश्चित्तवृत्तिम् ॥ 31

नाकौकश्शत्रु जत्रु त्रुटन विघटित स्कन्ध नीरन्ध्रनिर्यत्
नव्य क्रव्यास्त्र हव्य ग्रसन रस लसज्ज्वाल जिह्वालवह्निम् ।
यं दृष्ट्वा सांयुगीनं पुनरपि विदधत्याशिषो वीर्यवृद्ध्यै
गीर्वाणा निर्वृणाना वितरतु स जयं विष्णुहेतिप्रधिर्वः ॥ 32 ॥

धन्वाध्वन्यस्य धारा सलिलमिव धनं दुर्गतस्येव दृष्टिः
जात्यन्धस्येव पङ्गोः पदविहृतिरिव प्रीणनी प्रेमभाजाम् ।
पत्युर्मायाः क्रियायां प्रकटपरिणतिर्विश्वरक्षाक्षमायां
मायामायामिनीं वः त्रुटयतु महती नेमिरस्त्रेश्वरस्य ॥ 33 ॥

त्राणं या विष्टपानां वितरति च यया कल्प्यते कामपूर्तिः
न स्थातुं यत्पुरस्तात् प्रभवति कलयाप्योषधीनाम् अधीशः ।
उन्मेषो याति यस्या न समयनियतिं सा श्रियं वः प्रदेयात्
न्यक्कृत्य द्योतमाना त्रिपुरहरदृशं नेमिरस्त्रेश्वरस्य ॥ 34 ॥

नक्षत्र क्षोद भूति प्रकरविकिरण श्वेतिताशावकाशा
जीर्णैः पर्णैरिव द्यां जलधरपटलैश् चूर्णितैरूर्णुवाना ।
आजावाजानवाजानत रिपुजनतारण्यमावर्तमाना
नेमिर्वात्येव चाक्री प्रणुदतु भवतां संहतं पापतूलम् ॥ 35 ॥

क्षिप्त्वा नेपथ्यशाटीमिव जलदघटां जिष्णुकोदण्डचित्रां
तारापुञ्जं प्रसूनाञ्जलिमिव विपुले व्योमरङ्गे विकीर्य ।
निर्वेदग्लानि चिन्ता प्रभृति परवशानन्तरा दानवेन्द्रान्
नृत्यन् नानालयाढ्यं नट इव तनुतां शर्म चक्रप्रधिर्वः ॥ 36 ॥

दौर्गत्य प्रौढताप प्रतिभटविभवा वित्तधाराः सृजन्ती
गर्जन्ती चीत्क्रियाभिर् ज्वलदनलशिखोद्दाम सौदामनीका ।
अव्यात् क्रव्याद्वधूटी नयनजलभरैर्दिक्षु नव्याननाव्यान्
पुष्यन्ती सिन्धुपूरान् रथचरणपतेर्नैमिकादम्बिनी वः ॥ 37 ॥

सन्दोहं दानवानाम् अजसमजमिवाऽऽलभ्य जाज्वल्यमाने
वह्नावह्नाय जुह्वत् त्रिदशपरिषदे स्वस्वभागप्रदायी ।
स्तोत्रैर्ब्रह्मादिगीतैर्मुखरपरिसरं श्लाघ्यशस्त्रप्रयोगं
प्राप्तः सङ्ग्रामसत्रं प्रधिरसुररिपोः प्रार्थितं प्रस्नुतां वः ॥ 38 ॥

उत्पातालातकल्पान्यसुरपरिषदाम् आहव प्रार्थिनीनाम्
अध्वानध्वावबोध क्षपणचणतमः क्षेपदीपोपमानि ।
त्रैलोक्यागार भारोद्वहन सहमणि स्तम्भ सम्पत्सखानि
त्रायन्ताम् अन्तिमायां विपदि सपदि वोऽराणि सौदर्शनानि ॥ 39

ज्वाला जालप्रवाळ स्तबकित शिरसो नाभिमावालयन्त्यः
सिक्ता रक्ताम्बुपूरैः शकलित वपुषां शात्रवानी किनीनाम् ।
चक्राक्रीडप्ररूढा भुजग शयभुजो पद्म निघ्नप्रचाराः
पुष्यन्त्यः कीर्तिपुष्पाण्यरकनकलताः प्रीतये वः प्रथन्ताम् ॥ 40

ज्वाला जालाब्धिमुद्रं क्षितिवलयमिवाऽऽबिभ्रती नेमिचक्रं
नागेन्द्रस्येव नाभेः फणपरिषदिव प्रौढरत्न प्रकाशा ।
दत्तां वो दिव्यहेतेर्मतिमरविततिः ख्यातसाहस्र सङ्ख्या
सङ्ख्यावत्सङ्घचित्त श्रवणहरगुण स्यन्दि सन्दर्भगर्भाम् ॥ 41

ब्रह्मेशो पक्रमाणां बहुविध विमत क्षोद सम्मोदितानां
सेवायै देवतानां दनुजकुलरिपोः पिण्डिकाद्यङ्ग भाजाम् ।
तत्तद्धामान्त सीमा विभजन विधये मान दण्डायमाना
भूमानं भूयसा वो दिशतु दशशती भास्वराणाम् अराणाम् ॥ 42

ज्वाला कल्लोलमाला निबिडपरिसरां नेमिवेलां दधाने
पूर्वेणा क्रान्तमध्ये भुवनमय हविर्भोजिना पूरुषेण ।
प्रस्फूर्जत्प्राज्यरत्ने रथपदजलधौ एधमानैः स्फुलिङ्गैः
भद्रं वो विद्रुमाणां श्रियमरविततिर्विस्तृणाना विधत्ताम् ॥ 43

नासीर स्वैरभग्न प्रतिभट रुधिरासारधाराव सेकान्
एकान्त स्मेरपद्म प्रकर सहचरच्छायया प्राप्य नाभ्या ।
मुक्तानीवाङ्कुराणि स्फुर दनलशिखा दर्शित प्राक् प्रवालानि
अव्याघातेन भव्यं प्रददतु भवतां दिव्यहेतेरराणि ॥ 44 ॥

दावोल्का मण्डलीव द्रुमगणगहने बाडबस्येव वह्नेः
ज्वाला वृद्धीर्महाब्धौ प्रवयसि तमसि प्रातरर्क प्रभेव ।
चक्रे या दानवानां हयकर टिघटा सङ्कटे जाघटीति
प्राज्यं सा वः प्रदेयात् पदमरपरिषत् पद्मनाभायुधस्य ॥ 45 ॥

तापाद्दैत्य प्रतापा तपसमुपचितात् त्रायमाणं त्रिलोकीं
लोलैर्ज्वालाकलापैः प्रकटयदभितश् चीनपट्टाञ्चलानि ।
छत्राकारं शलाका इव कनककृताः शौरिदोर्दण्डलग्नं
भूयासुर्भूषयन्त्यो रथचरणमरस्फूर्तयः कीर्तये वः ॥ 46 ॥

नाभीशाला निखातां नहनसमुचितां वैरिलक्ष्मीवशानां
संयद्द्वारीहृतानां समनुविदधती काञ्चनालानपङ्क्तिम् ।
राज्या च प्राज्यदैत्य व्रजविजय महोत्तम्भितानां भुजानां
तुल्या चक्रारमाला तुलयतु भवतां तूलवच्छत्रुलोकम् ॥ 47 ॥

आनेमेश्चक्रवालात् त्विष इव वितताः पिण्डिकाचण्डदीप्तेः
दीप्ता दीपा इवाऽऽराद् गहनरणतमी गाहिनः पूरुषस्य ।
शाणे रोषाणितानां रथचरणमये शत्रु शौण्डीर्यहेम्नां
रेखाः प्रत्यग्रलग्ना इव भुवनमरश्रेणयः प्रीणयन्तु ॥ 48 ॥

दीप्तैरर्चिः प्ररोहैर्दळवति विधृते बाहुनाळेन विष्णोः
उद्यत्प्रद्योतनाभं प्रथयति पुरुषं कर्णिकावर्णिकायाम् ।
चूडालं वेदमौळिं कलयति कमले चक्रनाम्नोपलक्ष्ये
लक्ष्मीं स्फारामराणि प्रतिविदधतु वः केसर श्रीकराणि ॥ 49

धातुस्यन्दैरमन्दैः कलुषितवपुषो निर्झराम्भः प्रपातान्
अर्चिष्मत्या स्वमूर्त्या रथचरणगिरेर्नेमिनाभीतटस्य ।
व्याकुर्वाणाऽरपङ्क्तिः वितरतु विभुता विस्तृतिं वित्तकोटी
कोटीरच्छत्र पीठी कटक करिघटा चामर स्रग्विणीं वः ॥ 50 ॥

ऐक्येन द्वादशानाम् अशिशिरमहसां दर्शयन्ती विवृत्तिं
दत्तः स्वर्लोक लक्ष्म्यास्तिलक इव मुखे पद्मरागद्रवेण ।
देयाद्दैतेय दर्प क्षतिकरण रण प्रीणिताम्भोजनाभिः
नाभिर्नाभित्वमुर्व्याः सुरपति विभवस्पर्शि सौदर्शनी वः ॥ 51 ॥

शस्त्रश्यामे शताङ्ग क्षितिभृति तरलैरुत्तरङ्गे तुरङ्गैः
त्वङ्गन्मातङ्गनक्रे कुपितभटमुखच्छाय मुग्धप्रवाले ।
अस्तोकं प्रसूनुवाना प्रतिभटजलधौ पाटवं बाडबस्य
श्रेयो वस्संविधत्तां श्रितदुरितहरा श्रीधरास्त्रस्य नाभिः ॥ 52 ॥

ज्वालाचुडाल कालानल चलनसमाडम्बरा साम्परायं
यासावासाद्य माद्यत्सुरसुभट भुजास्फोटकोला हलाढ्यम् ।
दैत्यारण्यं दहन्ती विरचयति यशोभूतिशुभ्रां धरित्रीं
सा वश्चक्रस्य नक्रस्यदमृदित गजत्रायिणी नाभिरव्यात् ॥ 53 ॥

विन्दन्ती सान्ध्यमर्चिर्विदलितवपुषः प्रत्यनीकस्य रक्तैः
स्फायन्नक्षत्रराशिर्दिशिदिशि कणशः कीकसैः कीर्यमाणैः ।
नाकौकः पक्ष्मलाक्षी नवमद हसितच्छायया चन्द्रपादान्
राथाङ्गी विस्तृणाना रचयतु कुशलं पिण्डिका यामिनी वः ॥ 54

निस्सीमं निस्सृताया भुजधरणिधराघाटतः कैटभारेः
आशाकूलङ्कष ऋद्धेः अहितबल महाम्भोधिं आसादयन्त्याः ।
चक्रज्वालापगायाश्चलदरलहरी मालिका दन्तुरायाः
बिभ्रत्या वर्तभावं भ्रमयतु भुवने पिण्डिका वः प्रशस्तिम् ॥ 55

पाणौ कृत्वाहवाग्रे प्रतिभट विजयो पार्जितां वीरलक्ष्मीम्
आनीतायास्ततोऽस्याः स्वसविधमसुरद्वेषिणा पूरुषेण ।
प्रासादं वासहेतोर्विरचितमरुणैर्रश्मिभिस्सूचयन्ती
नाभिर्वो निर्मिमीतां रथचरणपतेर्निर्वृतिं निर्विघाताम् ॥ 56 ॥

डिण्डीरापाण्डुगण्डैररियुवतिमुखैः पिण्डिका कृष्णहेतेः
उच्चण्डाश्रुप्रवर्षैरुपरततिलकैरुक्तशौण्डीर्यचर्या ।
द्वित्र ग्रामाधिपत्य द्रुहिण मदमषी दूषिताक्ष क्षमाभृत् -
सेवा हेवाकपाकं शमयतु भवतां कर्म शर्मप्रतीपम् ॥ 57 ॥

पर्याप्तामुन्नतिं या प्रथयति कमलं या तिरोभाव्य भाति
स्त्रष्टुस्सृष्टेर्दवीयः कुवलयमहितं या बिभर्ति स्वरूपम् ।
भूम्ना स्वेनान्तरिक्षं कबलयति च या सा विचित्रा विधत्तां
दैतेयारातिनाभिर्द्रविणपतिपद द्वेषिणीं सम्पदं वः ॥ 58 ॥

वाणी वाङ्गैश्चतुर्भिः सदसि सुमनसां द्योतमानस्वरूपा
बाह्वन्तस्था मुरारेरभिमतमखिलं श्रीरिव स्पर्शयन्ती ।
दुर्गेवोग्राकृतिर्या त्रिभुवनजननस्थेम संहारधुर्या
मर्यादालङ्घनं वः क्षपयतु महती हेतिवर्यस्य नाभिः ॥ 59 ॥

स्रग्भिस्सन्तानजाभिर्मधुर मधुरसस्यन्द सन्दोहिनीभिः
पाटीरैः प्रौढचन्द्रातपचय सुषमालोपनैर्लेपनैश्च ।
धूपैः काला गरूणामपि सुरसुदृशो विस्त्रमर्चासु यस्याः
गन्धं रुन्धन्ति सा वश्चिरमसुरभिदो नाभिरव्यादभव्यात् ॥ 60

अंहस्संहत्य दग्ध्वा प्रतिजनि जनितं प्रौढसंसारवन्या
दूराध्वन्यानधन्यान् महति विनतिभिर्धामनि स्थापयन्ती ।
विश्रान्तिं शाश्वतीं या नयति रमयतां चक्रराजस्य नाभिः
संयन्मोमुह्यमान त्रिदशरिपुदशा साक्षिणी साऽक्षिणी वः ॥ 61

श्रुत्वा यन्नामशब्दं श्रुतिपथकटुकं देवनक्रीडनेषु
स्ववैरिस्वैरवत्यो भयविवशधियः कातरन्यस्त शाराः ।
मन्दाक्षं यान्त्यमन्दं प्रतियुवतिमुखैर्दर्शितोत्प्रासदर्पैः
अक्षं सौदर्शनं तत् क्षपयतु भवताम् एधमानां धनायाम् ॥ 62

व्यस्तस्कन्धं विशीर्ण प्रसवपरिकरं प्रत्तपत्रोपमर्दं
संयद्वर्षासु तर्षातुर खगपरिषत्पीत रक्तोदकासु ।
अक्षं रक्षस्तरूणाम् अशनिवदशनैरापतन् मूर्ध्निमूर्ध्नि
स्तादस्त्राधीशितुर्वः स्तबकितयशसो द्वेषिणां प्लोषणाय ॥ 63 ॥

दीक्षां सङ्ग्रामसत्रे महति कृतवतो दीप्तिभिस्संहताभिः
  जिह्वाले सप्तजिह्वे दनुजकुलहविर्जुह्वतो नेमिजुह्वा ।
वैकुण्ठास्त्रस्य कुण्डं महदिव विलसत् पिण्डिका वेदिमध्ये
  दिश्यात् दिव्यर्द्धिदेश्यं पदमिह भवताम् अक्षतोन्मेषमक्षम् ॥ 64

तुङ्गाद् दोरद्रि शृङ्गाद्दनुज विजयिनः स्पष्टदानोद्यमानां
  शत्रुस्तम्बेरमाणां शिरसि निपततः स्त्रस्त मुक्तास्थिपुञ्जे ।
रक्तैरभ्यक्तमूर्तैर्विदलनगलितैर्व्यक्त वीरायितर्द्धैः
  हर्यक्षस्यारिभङ्गं जनयतु जगतां ईडितं क्रीडीतं वः ॥ 65 ॥

उन्मीलत्पद्मरागं कटकमिव धृतं बाहुना यन्मुरारेः
  दीप्तान् रश्मीन् दधानं नयनमिव यदुत्तारकं विष्टपस्य ।
चक्रेशार्कस्य यद्वा परिधिरभिदधद् दैत्यहत्यामिव द्राक्
  अक्षं पक्षे पतित्वा परिघटयतु वस्तद्द्रढिष्ठां प्रतिष्ठाम् ॥ 66 ॥

क्रीडत्प्राक्क्रोड दंष्ट्रा हतिदलित हिरण्याक्ष वक्षः कवाट
  प्रादुर्भूत प्रभूत क्षतज समुदितारुण्यमुद्रं समुद्रम् ।
उन्मीलत्किंशुकाभै रुपहसदमितैः अंशुभिस्संशयघ्नीम्
  अक्षं चक्रस्य दत्ताम् अघशतशमनं दाशुषीं शेमुषीं वः ॥ 67

पद्मोल्लासप्रदं यज्जनयति जगतीम् एधमान प्रबोधां
यस्यच् छायासमाना लसति परिसरे रोहिणी तारकाग्र्या ।
नाना हेत्युन्नतत्वं प्रकटयति च यत्प्राप्तकृष्णप्रयाणं
त्रेधा भिन्नस्य धाम्नः समुदय इव तत्पातु वश्चाक्रमक्षम् ॥ 68 ॥

शोचिर्भिः पद्मराग द्रवसम सुषमैः शोभमानावकाशं
प्रत्यग्रा शोकरागप्रति भटवपुषा भूषितं पूरुषेण ।
अन्तः स्वच्छन्द मग्नोत्थितभृगु तनयं क्षत्रियाणां क्षतानां
आरब्धं शोणितौघैस्सर इव भवतो दिव्यहेत्यक्षमव्यात् ॥ 69

मत्तानामिन्द्रियाणां कृतविषयमहा कानन क्रीडनानां
सृष्टं चक्रेश्वरेण ग्रहणधिषणया वारिवद्वारणानाम् ।
गम्भीरं यन्त्रगर्तं कमपि कृतधियो मन्वते यत्प्रदेयात्
अस्थूलां संविदं वः त्रिजगदभिमत स्थूललक्षं तदक्षम् ॥ 70 ॥

प्राणादीन् सम् नियम्य प्रणिहितमनसां योगिनामन्तरङ्गे
तुङ्गं सङ्कोच्य रूपं विरचित दहरा काश कृच्छ्रासिकेन ।
प्राप्तं यत् पूरुषेण स्वमहिमसदृशं धाम कामप्रदं वः
भूयात् तद् भूर्भुवस्स्वस् त्रयवरिवसितं पुष्कराक्षायुधाक्षम् ॥ 71

विद्धान् वीध्रेण धाम्ना चरणनखभुवा बद्धवासस्य मध्ये
चक्राध्यक्षस्य बिभ्रत्परिहसितजपा पुष्पकोशान् प्रकाशान् ।
शुभ्रै रभ्रै रदभ्रैश्शरदि तत इतो व्योम विभ्राजमानं
प्रातस्त्यादित्य रोचिस्ततमिव भवतः पातु राथाङ्गमक्षम् ॥ 72

श्रीवाणी वाङ्मृडान्यो विदधति भजनं शक्तयो यस्य दिक्षु
प्राह व्यूहं यदाद्यं प्रथममपि गुणं भारती पाञ्चरात्री ।
घोरां शान्तां च मूर्तिं प्रथयति पुरुषः प्राक्तनः प्रार्थनाभिः
भक्तानां यस्य मध्ये दिशतु तदनघां अक्षमध्यक्षतां वः ॥ 73 ॥

रक्षः पक्षेण रक्षत् क्षतममरगणं लक्ष्यवैलक्ष्यमाजौ
लक्ष्मीम् अक्षीयमाणां वलमथनभुजे वज्रशिक्षानपेक्षे ।
निक्षिप्य क्षिप्रमध्य क्षयति जगति यद्दक्षतां दिव्यहेतेः
अक्षामाम् अक्षमां तत् क्षपयतु भवताम् अक्षजिल्लक्षमक्षम् ॥ 74

ज्योतिश्चूडालमौळिस् त्रिनयनवदनष् षोडशोत्तुङ्गबाहुः
प्रत्यालीढेन तिष्ठन् प्रणवशशधराधार षट्कोणवर्ती ।
निस्सीमेन स्वधाम्ना निखिलमपि जगत् क्षेमवन्निर्मिमाणः
भूयात् सौदर्शनो वः प्रतिभटपरुषः पूरुषः पौरुषाय ॥ 75 ॥

वाणी पौराणिकी यं प्रथयति महितं प्रेक्षणं कैटभारेः
शक्तिर्यस्येषु दंष्ट्रा नखपरशुमुख व्यापिनी तद्विभूत्याम् ।
कर्तुं यत् तत्वबोधो न निशितमतिभिर्नारदाद्यैश्च शक्यः
दैवीं वो मानुषीं च क्षिपतु स विपदं दुस्तराम् अस्त्रराजः ॥ 76

रूढस्तारालवाले रुचिरदलचयः श्यामलैश्शस्त्रजालैः
ज्वालाभिस्सप्रवाळः प्रकटितकुसुमो बद्धसङ्घैः स्फुलिङ्गैः ।
प्राप्तानां पादमूलं प्रकृतिमधुरयाच्छायया तापहृद्भः
दत्तामुद्दोः प्रकाण्डः फलमभिलषितं विष्णुसङ्कल्पवृक्षः ॥ 77 ॥

धाम्नामैरम्मदानां निचयमिव चिरस्थायिनां द्वादशानां
मार्तण्डानां समूढं मह इव बहुलां रत्नभासामिवर्द्धिम् ।
अर्चिस्सङ्घातमेकी कृतमिव शिखिनां बाडबाग्रेसराणां
शङ्कन्ते यस्य रूपं स भवतु भवतां तेजसे चक्रराजः ॥ 78 ॥

उग्रं पश्याक्षमुद्यद् भ्रुकुटि समुकुटं कुण्डलि स्पष्टदंष्ट्रं
चण्डास्त्रैर्बाहुदण्डैर्लसदनलसमक्षौम लक्ष्योरुकाण्डम् ।
प्रत्यालीढस्थपादं प्रथयतु भवतां पालनव्यग्रमग्रे
चक्रेशोऽकालकाले रितभट विकटा टोपलोपाय रूपम् ॥ 79 ॥

चक्रं कुन्तं कृपाणं परशु हुतवहावङ्कुशं दण्डशक्ती
शङ्कं कोदण्डपाशौ हलमुसल गदा वज्रशूलांश्च हेतीन् ।
दोर्भिस्सव्यापसव्यैः दधदतुलबलस्तम्भितारातिदर्पैः
व्यूहस्तेजोभिमानी नरक विजयिनो जृम्भतां सम्पदे वः ॥ 80 ॥

पीतं केशे रिपोरप्यसृजि रथपदे संश्रितेऽप्युत्कटाक्षं
चन्द्राधः कारि यन्त्रे वपुषि च दळने मण्डले च स्वराङ्कम् ।
हस्ते वक्रे च हेतिस्तबकितमसमं लोचने माचने च
स्तादस्तोकाय धाम्ने सुरवरपरिषत् सेवितं दैवतं वः ॥ 81॥

चित्राकारैः स्वचारैर्मितसकलजगज्जागरूक प्रतापः
मन्त्रं तन्त्रानुरूपं मनसि कलयतो मानयन्नात्मगुह्यान् ।
पञ्चाङ्ग स्फूर्ति निर्वर्तित रिपु विजयो धाम षण्णां गुणानां
लक्ष्मीं राजासनस्थो वितरतु भवतां पूरुषश्चक्रवर्ती ॥ 82 ॥

अक्षावृत्ताभ्र मालान्यरविवर लुठच् चन्द्रचण्डद्युतीनि
ज्वालाजालावलीढ स्फुटदुडुपटली पाण्डुदिङ् मण्डलानि ।
चक्रान्ता क्रान्तचक्रा चलचलितमही चक्रवालार्तशेषाणि
अस्त्रग्रामाग्रिमस्य प्रददतु भवतां प्रार्थितं प्रस्थितानि ॥ 83॥

शूलं त्यक्तात्मशीलं सृणिरणुक घृणिः पट्टिसः स्पष्टसादः
शक्तिश्शालीनशक्तिः कुलिशमकुशलं कुण्ठधारः कुठारः ।
दण्डश्चण्डत्वशून्यो भवति तनु धनुर्यत्पुरस्तात् स वः स्तात्
ग्रस्ताशेषास्त्रगर्वो रथचरणपतिः कर्मणे शार्मणाय ॥ 84 ॥

क्षुण्णा जानेयबृन्दं क्षुभित रथगणं सन्नसान्नाह्य यूथं
क्ष्वेलासंरम्भहेला कलकलविगलत् पूर्वगीर्वाण गर्वम् ।
कुर्वाणस्सांपरायं रथचरणपतिः स्थेयसीं वः प्रशस्तिं
दुग्धां दुग्धाब्धिभासं भय विवश शुना सीरनासीरवर्ती ॥ 85 ॥

द्रुह्यद् दोश्शालिमालि प्रहरण रभसोत्तानिते वैनतेये
विद्राति द्राक्प्रयुक्तः प्रथनभुवि परावर्तमानेन भर्त्रा ।
निर्जित्य प्रत्यनीकं निरवधिकचरद् धास्तिकाश्वीयरथ्यं
पथ्यं विश्वस्य दाश्वान् प्रथयतु भवतो हेतिरिन्द्रानुजस्य ॥ 86॥

नन्दिन्यानन्दशून्ये गलति गणपतौ व्याकुले बाहुलेये
चण्डे चाकित्यकुण्ठे प्रमथपरिषदि प्राप्तवत्यां प्रमाथम् ।
उच्छिद्याजौ बलिष्ठं बलिजभुजवनं यो ददावादिभिक्षोः
भिक्षां तत्प्राणरूपां स भवदकुशलं कृष्णहेतिः क्षिणोतु ॥ 87॥

रक्तौघाभ्यक्त मुक्ता फललुलित ललद्वीचि वृद्धौ महाब्धौ
सन्ध्या सम्बद्ध तारा जलधर शबला काशनी काशकान्तौ ।
गम्भीरारम्भम् अम्भश्चरमसुरकुलं वेदविघ्नं विनिघ्नन्
निर्विघ्नं वः प्रसूतां व्यपगत विपदं संपदं चक्रराजः ॥ 88 ॥

काशीविप्लोष चैद्यक्षपण धरणिजध्वंस सूर्यापिधान
ग्राहद्वेधात्व मालित्रुटनमुख कथावस्तु सत्कीर्ति गाथाः ।
गीयन्ते किन्नरीभिः कनकगिरि गुहा गेहिनीभिर्यदीयाः
देयाद् दैतेयवैरी स सकलभुवन श्लाघनीयां श्रियं वः ॥ 89 ॥

नानावर्णान् विवृण्वन् विरचित भुवनानुग्रहान् विग्रहान् यः
चक्रेष्वष्टासु मृष्टासुरवर तरुणी कण्ठ कस्तूरिकेषु ।
आताराद्र्णमाला वधिषु वसति यः पूरुषो वस्स देयात्
व्यध्वैरुद्भूतसत्त्वैरुपहितमबहिर्ध्वान्तम् अध्वान्तवर्ती ॥ 90 ॥

द्वात्रिंशत् षोडशाष्ट प्रभृति पृथुभुज स्फूर्तिभिर्मूर्ति भेदैः
कालाद्ये चक्रषट्के प्रकटितविभवः पञ्चकृत्यानुरूपम् ।
अर्थानामर्थितानाम् अहरहर् अखिलं निर्विलम्बैर्विलम्बैः
कुर्वाणो भक्तवर्गं कुशलिनमवतात् आयुधग्रामणीर्वः ॥ 91 ॥

कौणैरणैस्सरोजैरपि कपिशगुणैष् षड्भिरुद्भिन्नशोभे
  श्रीवाणी पूर्विकाभिः दधति विलसतः शक्तिभिः केशवादीन् ।
तारान्ते भूपुरादौ रथचरणगदा शार्ङ्ग खड्गाङ्किताशे
  यन्त्रे तन्त्रोदिते वः स्फुरतु कृतपदं लक्ष्म लक्ष्मीसखस्य ॥ 92

दंष्ट्रा कान्त्या कडारे कपट किटितनोः कैटभारे रधस्तात्
  ऊर्ध्वं हासेन विद्धे नरहरिवपुषो मण्डले वासवीये ।
प्राक्प्रत्यक्सान्ध्य सान्द्रच्छविभर भरिते व्योम्नि विद्योतमानः
  दैतेयोत्पातशंसी रविरिव रहयतु अस्त्रराजो रुजं वः ॥ 93 ॥

कोणे क्वापि स्थितोऽपि त्रिभुवनविततश् चन्द्रधामापि रूक्षः
  रुक्मच्छायोऽपि कृष्णाकृतिरनलमयोऽप्याश्रित त्राणकारी ।
धारा सारोऽपि दीप्तो दिनकर रुचिरोऽप्युल्लसत्तारक श्रीः
  चक्रेशश्चित्रभूमा वितरतु विमत त्रासनंशासनं वः ॥ 94 ॥

शुक्रश्शक्र ! स्तवस्ते सह दहन ! कलां काल ! तेऽयं न कालः
  किं वो रक्षांसि ! रक्षा ? तव फलतु पते ! यादसां पादसेवा ।
वायो ! हृद्योऽसि भर्तुस्त्यज धनद ! मदं सेव्यतां त्र्यम्बकेति
  प्राहुर्यद्यन्त्रपालाः स दनुजविजयी हन्तु तन्द्रालुतां वः ॥ 95॥

गायत्र्यर्णारचक्रे प्रथम मनुसखस्मेर पत्रारविन्दे
बिंबं वह्नेस्त्रिकोणं वहति जयिजयाद्यष्टशक्तौ निषण्णा ।
शोकं वोऽशोकमूले पदसविधलसद् भीम भीमाक्ष भीमा
पुंसो दिव्यास्त्रधामा पुरुष हरिमयी मूर्तिरस्यत्वपूर्वा ॥ 96॥

पाश्चात्याशोक पुष्प प्रकरनिपतितैः प्राप्तरागं परागैः
सन्ध्यारोचिः सगन्धैः स्वपदशशधरं प्रेक्ष्य तारानुषक्तम् ।
पद्मानाबद्धकोशानिव सुरनिवहैरञ्जलीन् कल्प्यमानान्
चक्राधीशोऽभिनन्दन् प्रदिशतु सदृशीम् उत्तमश्लोकतां वः ॥ 97

रक्ताशोकस्य वेदस्य च निहितपदं प्राप्तशाखस्य मूले
चक्रैरस्त्रैस्तदाद्यैरपि महित चतुर्द्धिश्चतुर्बाहु दण्डम् ।
आसीनं भासमानं स्थितमपि भयतस्त्रायतां तत्त्वमेकं
पश्चात्पूर्वत्र भागे स्फुटनर हरिता मानुषं जानुषाद्वः ॥ 98॥

प्राणे दत्तप्रयाणे मुषितदिशि दृशि त्यक्तसारे शरीरे
मत्यां व्यामोहवत्यां सतमसि मनसि व्याहते व्याहृते च ।
चक्रान्तर्वर्ति मृत्यु प्रतिभयमुभयाकारचित्रं पवित्रं
तेजस्तत्तिष्ठतां वः त्रिदश कुलधनं त्रीक्षणं तीक्ष्णदंष्ट्रम् ॥ 99॥

यस्मिन् विन्यस्य भारं विजयिनि जगतां जङ्गमस्थावराणां
 लक्ष्मी नारायणाख्यं मिथुनमनुभवत्यत्युदारान् विहारान् ।
आरोग्यं भूतिमायुः कृतमिह बहुना यद्यदास्थापदं वः
 तत्तत्सद्यस्समस्तं दिशतु स पुरुषो दिव्यहेत्यक्षवर्ती ॥ 100॥

॥ अथ निगमनश्लोकः ॥

पद्यानां तत्त्वविद्याद्युमणि गिरिशवीध्यङ्ग संख्याधराणाम्
 अर्चिष्यङ्गेषु नेम्यादिषु च परमतः पुंसि षड्विंशतेश्च ।
सङ्घैस्सौदर्शनं यः पठति कृतमिदं कूरनारायणेन
 स्तोत्रं निर्विष्टभोगो भजति स परमां चक्रसायुज्यलक्ष्मीम् ॥

इति श्रीसुदर्शनशतकम् संपूर्णम्